International Journal of Applied Research 2017; 3(7): 684-685



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(7): 684-685
www.allresearchjournal.com
Received: 06-05-2017
Accepted: 07-06-2017

**डॉ. सुमन रानी**
LECT. Sanskrit, G.S.S.S.
Suketri, Panchkula, Haryana,
India

**Correspondence**
**डॉ. सुमन रानी**
LECT. Sanskrit, G.S.S.S.
Suketri, Panchkula, Haryana,
India

# भवभूतिविरचित उत्तररामचरिते मानवकल्याणस्य भावनायाः विवेचनम्

**डॉ. सुमन रानी**

संस्कृत–वाङ्मये महाकवि भवभूतिः निज रचनात्रयबलेन देदीप्यमाननक्षत्रमिव प्रकाशते। यद्यपि तस्य एका एव रचना उत्तररामचरितनाटकं तस्य कीर्ति दिक्षु तनोति। उत्तररामचरितमतिरिच्य महावीरचरितमपरं नाटकमस्ति एवञ्च मालतीमाधवं प्रकरणग्रन्थः। त्रिषु ग्रन्थेषु भवभूतेः जनहित कामनायाः यत्र–तत्र अवलोकनं भवति। उत्तररामचरितस्य ग्रन्थारम्भे एव नमस्कारात्मकं मङ्गलमाचरति कथयति च–

इदं कविभ्यः पूर्वेभ्यो नमो वाकं प्रशास्महे।
विन्देम देवतां वाचममृताम् आत्मनः कलाम्।। [1]

अत्र इदम्–पदस्य इवर्णो देवार्थवाचकः। अपरः शब्दः कविरपि ब्रह्मपदवाच्यत्वात् मङ्गलवाचकोऽस्ति। यतो हि कथितमस्ति–कविर्मनीषी परिभूः स्वयम्भूः एतदतिरिच्य अमृतां परमात्मनः कलाम् वाणीं देवताम्, इत्यादीनि पदानि अपि देवत्वविशिटानि सन्ति।
इत्यं महाकवि भवभूति प्राचीनेभ्यः काव्यकर्तृभ्यो व्यासवाल्मीक्यादिभ्यो नमस्कारोच्चारण–पूर्वकं कथयति, यत् वयं परमात्मनोंऽशभूतां शाश्वतीं दिव्यगुणमयीं वाग्देवीं सरस्वतीं प्राप्नुयाम, येनास्माकं मनसि सर्वथा प्रकाशो भवेत्।
इत्थं भवभूतेः अन्यासु रचनासु अपि यथार्थमवसरानुपेतं पात्रोचितं सार्थकञ्च मङ्गलानुशासनं यत्र–तत्र दृश्यते। उत्तररामचरितस्य प्रथमाङ्के भगवतीसीतादेव्यै वशिष्ठेन यः आशीषः प्रदत्तेऽस्ति तत् शोभनमेव–

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च।।

तत्किमन्यदाशास्महे? केवलं वीरप्रसवा भूयाः [2]
अत्र विश्वम्भरा पृथिवी श्रीशालिनी अस्ति सर्वेषां मङ्गलप्रदा एव। सहैव 'केवलं वीरप्रसवा भूयाः' इति शुभाशीर्वादे भवभूतेः जनहितभावना एव दृष्टिगोचरी भवति। यतो हि सीतायाः सकाशं सर्वमस्ति केवलं सर्वगुणोपेतो वीरसन्ततिः न। अतो गर्भिण्यै स्त्रियै लोकोनुचितं शुभाशीषं वीरप्रसवा भूयाः इति भवभूतिः प्रतिपादयति।
आशीर्वचनस्यास्यौचित्यं प्रतिपादयन् आचार्य–क्षेमेन्द्रः औचित्यविचारचर्चायाम् भणति, यत् यथा बहु धनं प्रदाय यो नृपो मनीषिणं प्रसीदयति आशीर्वादञ्च आप्नोति। एतद् तस्य अभ्युदयाय भवति, तथैव पूर्णमर्थं प्राकट्य सहृदयान् आह्लादयितुं क्षम काव्यम् उचिताशीर्वचनं मङ्गलप्रदं भवति–

पूर्णार्थदातुः काव्यस्य सन्तोषितमनीषिणः।
उचिताषीर्नृपसयेव भवत्यभ्युदयावहा।। [3]

उत्तररामचरितस्य द्वितीयाङ्के शम्बूकवधप्रसङ्गे रामेण शम्बूकाय दत्तः आशीर्वचो दिव्य एव–

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च सम्पदः।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः।। [4]

अत्र रामो दिव्यरूपधारिणं शम्बूकं कथयति, यत् तव कृते प्रसिद्धो ब्रह्मसम्बन्धिनो वैराजनामकाः लोकाः कल्याणकारिणो भवन्तु, येषु लोकेषु विभूतयो लभ्यन्ते। वस्तुतोऽत्र भवभूतिः स्वकीय मेधया एकतो रामस्य लोकानुरंजनस्य मर्यादापालनव्रतस्य च निर्वाहम् अकारयत्, परतः शम्बूकाय तपसाधिकं वरं दत्त्वा मृत्युं प्राप्य अपि प्रसन्नताम् अयच्छत्।

उत्तररामचरितस्य तृतीयाङ्के वासन्ती वनवासकाले जानकीपालिगजकलभं प्रति सीतारामयोः ध्यानम् अभिमुखं करोति [5] गजशावकोपरि कश्चन मदमत्तगजः आक्रमणम् अकरोत् परञ्च स विजितः–

वासन्ती–'देव मोदस्य विजयिना वधूद्वितीयेन देव्याः पुत्रकेण' [6]

रामः तस्य जयं विज्ञाय प्रसन्नो भवति एवञ्च विजयी भव इत्याशीर्वादं प्रयच्छति। [7] तत्रैव छायारूपसीता स्वपुत्रवत्–गजकलभम् आशीर्वादं प्रददाति यत् स स्वकीय–प्रियतमया करेणुक्या वियुक्तो मा भवेत् सीता कथयति–

'अवियुक्त इदानीं दीर्घायुरनया सौम्यदर्शनया भवतु।' [8]

अत्र सीतया प्रदत्तः आशीष 'अवियुक्तेदानीं दीर्घायुरनया सौम्यदर्शनया भवतु' इति पुत्रेभ्यो दीयमानेषु शुभवचस्सु श्रेष्ठतमो वर्तते।

अस्मिन्नेव तृतीयाङ्के रामस्य पुष्पकविमानेन गमनकाले सर्वे उत्त्थाय सीतारामयोः कल्याणाय मङ्लकामनां कुर्वन्ति। तमसावासन्त्यौ, सीतारामौ प्रति कथयतो यत् तमसासदृशीभिः पवित्र–नदीभिः एवञ्च वासन्तीसदृशीभिः वनदेवताभिः सह पृथ्वी भागीरथ्झी कुलपतिः वाल्मीकिः देवया अरुन्धत्या सह मुनिवशिष्ठश्च युवयोः द्वयोः महते कल्याणाय भद्रं वितनोतुः –

अवनिरमर–सिन्धुः सार्धम् अस्मद्विशभिः, स च कुलपति आद्यश्छन्दसां यः प्रयोक्ता।
स च मुनिरनुयातारुन्धतीको वशिष्ठः, तव वितरतु भद्रं भूयसे मङ्लाय।। [9]

उत्तररामचरितस्य पञ्चमाङ्के

''देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पतिः।
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरुणामपि।
ऐन्द्रावैष्णवमग्नि मारुतमथो सोशर्णमोजोऽस्तु ते।
देयादेव च रामलक्ष्मण धनुर्ज्या घोषमन्त्रे जयम्।।'' [10]

अत्र यादृशी विजयमङ्लकामना भवभूतिना कृता तेन तस्य मङ्लात्मिका दृष्टिः एव सुतरां ज्ञायते।

एवमेव षष्ठाङ्के रामस्य शान्तिपूर्णवचनं निशम्य युद्धरतौ लवश्चन्द्रकेतुश्च शस्त्रप्रहारं स्थगयतः शान्तश्च भवतः सहैवं अनमताम्। रामं प्रति द्वयोः ईदृशमादरातिशयं दृष्ट्वा विद्याधरः तस्मै रामाय पुत्रसमागमस्य शुभाशीषं ददाति–

शान्तं महापुरुषसंगदितं निशम्य तद् गौरवात् समुपसंहृत संप्रहारः।
शान्तो लवः प्रणत एव च चन्द्रकेतुः, कल्याणमस्तु सुतसंगमनेन राज्ञः।। [11]

अनेनैव प्रकारेण सप्तामाङ्के अपि भवभूतिः स्वमङ्लात्मिकां दृष्टिं प्रकटयति। सीतां प्रति वाल्मीकेः आशीर्वाददानप्रसङ्गे। वाल्मीकिना प्रदत्तः शुभाशीः सीतां प्रति वर्तते, यत्

'वत्से एवमेव चिरं भूयाः।'

अत्र लघुभिः शब्दैः सीतामाध्यमेन सम्पूर्णमहिलासमूहस्य कृते सर्वोत्तमा जनहितकामना वाल्मीकिना स्पष्टीकृता।

अस्मिन्नेव सप्तमाङ्के अरुन्धती सीतायै अतीव ऐतिहासिकमाशीर्वादं प्रदाय भवभूतेः मङ्गलात्मिकादृष्टेः परिचयं कारयति तद् यथा–

'लोपामुद्रानसूयाहमिति तिस्रस्त्वया सह।
प्रतिव्रताश्चतस्राऽत्र सन्तु जानकि साम्प्रतम्।।' [12]

सीतायाः पातिव्रत्यधर्मोऽलौकिकः। नवोढा अल्पायुसी अपि सा रामेण सह अरण्यं गतवती सर्वं वैभवं परित्यज्य अपरञ्च रामेण परित्यागे सत्यपि रामं न केवलं कदापि निन्दितवती अपितु रामस्य निन्दनं, नैव श्रोतुम् इष्टवती।

अस्मिन् एव अङ्के विश्वामित्ररामयोः सम्वादप्रसङ्गे अखिलसंसारस्य हिताय आशीर्वचसः प्रसङ्गः प्राप्यते। विश्वामित्रो राममाशीर्वादयाचनां कर्तुं कथयति, रामो विश्वामित्रं याचते यत्–
'राजानः आलस्यं विहाय पृथिवीं पालयन्तु, यथासमये मेघाः वर्षन्तु राष्ट्रं शस्यसम्पन्नं भवतु', प्रसादगुणोपेतकवितां प्रति कवीनां रूचिः भवतु विद्वांसोऽन्येषां रचनानां चिन्तनं मननं कृत्वा प्रमुदिताः भवन्तु–

रामः – क्ष्मापालाः क्षीणतंद्राः क्षितिवलयमिदं पान्तु मे कालवर्षा।
वार्वाहा सन्तु राष्ट्रं पुनरखिलम् अपास्तेति संपन्नसस्यम्।
लोके नित्यप्रमोदं विदधतु कवयः श्लोकमाप्तप्रसादं।
संख्यावन्तोऽपि भूम्ना परकृतिषु मुदं संप्रधार्य प्रयान्तु।। [13]

अयं सम्पूर्णोऽपि आयासः फलप्रदं कल्याणप्रदायकञ्च। इत्थं भवभूतेः समग्रसाहित्यस्य परिशीलनेन इदं मतं सुस्पष्टं भवति यत् तेन निज रचनासु बाहुल्येन जनहितभावना प्रकटिता।

## संदर्भ–सूत्र


1. उत्तररामचरितम्, प्रथमाङ्क–1
2. उत्तररामचरितम्, प्रथमाङ्क, श्लोकसंख्या 9, अनन्तरम्।
3. औचित्यविचारचर्चा, कारिका 39
4. उत्तररामचरितम्, 2/12
5. तत्रैव, पृ. 246
6. तत्रैव, पृ. 248
7. विजयतामायुष्मान् – उत्तररामचरितम्, पृ. 248
8. उत्तररामचरितम्, पृ. 249
9. तत्रैव, 3/48
10. तत्रैव, 5/27
11. तत्रैव, 6/27
12. तत्रैव, 7/36
13. तत्रैव, 7/42